# श्रीमद् भागवत रसिक कुटुंब

## श्री नंदनंदन स्तोत्र

**बालं नवीनशतपत्रविशालनेत्रं**

**बिम्बाधरं सजलमेघरुचिं मनोज्ञम् ।**

**मन्दस्मितं मधुरसुन्दरमन्दयानं**

**श्रीनन्दनन्दनमहं मनसा नमामि ॥ 1॥**

**मञ्जीरनूपुररणन्नवरत्नकाञ्ची**

**श्रीहारकेसरिनखप्रतियन्त्रसङ्घम् ।**

**दृष्ट्याऽऽर्तिहारिमषिबिन्दुविराजमानं**

**वन्दे कलिन्दतनुजातटबालकेलिम् ॥ 2॥**

**पूर्णेन्दुसुन्दरमुखोपरि कुञ्चिताग्राः**

**केशा नवीनघननीलनिभाः स्फुरन्ति ।**

**राजन्त आनतशिरःकुमुदस्य यस्य**

**नन्दात्मजाय सबलाय नमो नमस्ते ॥ 3॥**

श्रीनन्दनन्दनस्तोत्रं प्रातरुत्थाय यः पठेत् ।

तन्नेत्रगोचरो याति सानन्दं नन्दनन्दनः ॥ 4॥

इति गर्गसंहितायां गोलोकखण्डे विंशाध्यायान्तर्गता दुर्वससा कृता श्रीकृष्णस्तुतिः समाप्त ।